ः॥श्रीगणेशायनमः॥अथातश्चरणव्यूहंव्याख्यास्यामस्त्रय
ङ्कंचतुर्वेदंचतुरोवेदाविज्ञाताभवंति॥ऋग्वेदोयजुर्वेदः
सामवेदोथर्ववेदश्चेति॥तत्रऋग्वेदस्याएस्छानानिभेदाभ
वंति॥चर्चाश्रावकश्चर्वकश्चवणीयपारःक्रमपारःक्रमजट
क्रमषठक्रमदंडश्चेति॥चतुःपारायणमेतेषांशाखाः पं
चभेदाभवंति॥शाकलाबाष्कलाआश्वलायनासांख्या
यनामांडुकायनाश्चेति॥तेषामध्ययनमध्यायाश्चतुषष्ठि
र्मंडलानिदेवौचतु॥एकश्चएकवर्गश्चएकश्चनकेवेस्तथा॥
द्वौवर्गौद्वाऋचौज्ञेयौत्रिऋचात्रिनवतिस्मृति॥चतुऋ
चंसमाख्यातंषट्सप्तत्युत्तरंशतं॥पंचर्चंद्वादशाशा
न्यष्टाविंशोत्तराणिच॥शतत्रयंषट्ऋचंसप्तपंचाशा

दुत्तरं॥सप्तर्चमेकोनत्रिंशादुत्तरंशतमेककं॥अष्टर्च
मेवपंचाशद्वर्गास्युर्नाधिकोत्तराः॥वर्गाणांपरिसंख्या
तंद्विसहस्रोनसप्ततिः॥ऋचांदशसहस्राणिऋचांपंच
शतानिच॥ऋचामशीतिपादश्चेत्तत्पारायणमुच्यते॥७॥
यजुर्वेदस्यषडशीतिर्भेदाभवंति॥तत्रचरकानांद्वादशभे
दाभवंति॥चरकाध्वरकाकठाप्राच्यकठाकपिश्चलक
श्वारायणीयावार्त्तांतियाःश्वेताःश्वेतलराःऔपमन्यवः
पातांडनीयामैत्रायणीयाश्चेति॥तत्रमैत्रायणीयानांस
प्तभेदाभवंति॥मानवावाराहाडुंडुभाछागलेयाःश्याम
श्यामायनीयाहाडिंयाश्चेति॥तत्रहाडिंयानांपंचभेदा
भवंति॥हाडिंवमाशुरिगार्ग्यिगार्कराक्षमाग्रावत्यविमत्रं

पंचममेतेहारिद्रसंग्राहः॥ तेषामध्ययनमणदत्रायजुः स
हस्त्रेणधीत्यशाखापारोभवति॥ तान्येवद्विगुणान्यधीत्य
पदपारोभवति॥ तान्येवत्रिगुणान्यधीत्यक्रमपारोभवति॥
षडंगान्यधीत्यषडंगविद्भवति॥ तत्रषडंगानिभवंति॥ शिक्षा
कल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमितिषडंगानि॥ छंदः
पादौतुवेदस्यहस्तौकल्पोयपठ्यते॥ ज्योतिषामयनं २ २
प्रोक्तंनिरुक्तंश्रोत्रमुच्यते॥ शिक्षाघ्राणंतुवेदस्यमुखं
व्याकरणंस्मृतं॥ तस्मात्सांगमधीत्यैवब्रह्मलोकेमहीय
ते॥ तत्रोपांगानिभवंति॥ प्रातिपदमनुपदंछंदोभाषा
धर्मेमिमांसान्यायस्तर्कइत्युपांगानिभवंति॥ तत्रपरि
शिष्टानिभवंति॥ उपलक्षणंछागलक्षणंप्रतिज्ञानुवाकं
पदसंख्याचरणव्यूहश्राद्धकल्पशुल्बानिपार्षदम्यम्य

जुश्चमिष्टकापुरंध्रचराध्यायोछंदश्चक्रतुसंख्यानि
गमोयज्ञपार्श्वंहोत्रकंप्रसवोच्छानंक्रूर्मलक्षणमित्य
ष्टादशपरिशिष्टानिभवंति॥ तत्रैकगनोंतुचुकाध्ययना
दिविशेषः॥ चत्वारिंशदुपर्यंथास्तेनास्तियेनकाठके॥ त
त्रप्राच्योदीच्यांनैरुत्यवाजसनेयानांपंचदशप्रश्नेदाभवं
ति॥ जाबालाबौधेयाकालवामाध्यंदिनाश्चापेयापाय
णीयाकपोलापौंडरवत्साआवटिकापरमावटिकापा
राशराबैधेयावैनेयाश्रोरव्यावैजवाप्येति॥ त्रिगुणंव्य
तेयत्रमंत्रब्राह्मणयोःसह॥ यजुर्वेदःसविज्ञेयःशो
श्चाश्वांतरास्मृताः॥ द्वेसहस्रेशतेन्यूने मंत्रेवाजसनेय
के॥ ऋगणःपरिसंख्यातस्ततोन्यूनोनियजुःशीव
अष्टौसहस्राणिजातानिवाष्णाविंशतिरन्याभ्यधिकंवा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्यपादं॥ एतत्प्रमाणंयजुषां हि केवलंसवालखिल्यंचस
शुक्रियंयत्सरिवलवपरिसंख्यातं॥ (५) आलणंचच
तुर्थंएं॥ तत्रमाध्यंदिनानामध्ययनेविशेषः॥ चत्वा
रिंशदथध्यायामंत्रेवाजसनेयके॥ ऋचांतुपरिसंख्या
तंशतान्येकोनविंशतिः॥ पंचसप्तत्याधिकंसरिवलंच
सशुक्रियं॥ आलणंतुशतपथकांडानिचचतुर्दश॥ मं
त्रःपदंक्रमश्चैवचतुर्थीस्याज्जटास्तथा॥ क्रममालाशि
खालेखाध्वजोदंडोरथोघनः॥अष्टौविकृतयःप्रोक्ताः क्र
मपूर्वामनीषिभिः॥पारस्करंगृह्यसूत्रंसोत्रंकात्यायनंस्मृ
तं॥षडंगैःसहितोवेदोयथोक्तफलदोभवेत्॥सर्वानुक्र
मपदज्योतिर्यजुषांचविधानकं॥गलितंशिक्षादीपिका
चस्वैस्वराणांव्यंजनंतथा॥ऋतुशोभंचसावित्रंसूत्र

मंत्रप्रकाशकं॥मंत्रभाष्यंतथैवशिक्षाणांपंचकंतथा॥
मंत्रज्योतिश्चविज्ञेयामंत्राणांदीपिकातथा॥शेषम
ध्ययनंछिन्नकल्पग्रंथेषूपपद्यते॥तत्रतैत्तीरियका
नांहिनेदाश्वमेधिकाः॥औखेयापौखंडिकेयाश्चेति॥ते
त्रखंडिकेयानांपंचभेदाश्वमेधिकाः॥कालेताराख्यायंति
हिरण्यकेशीभारद्वाजापस्तंबश्चेति॥तेषामध्ययनं
सौत्रिकंप्रवचनीयाश्चेति॥मंत्रआलणकल्पानांसान्नां
वयजुषामृचः॥यस्यांयः प्रतिभागज्ञसोध्वर्यूकस्तउच्य
ते॥२॥सामवेदःकिलसहस्रभेदआसीत्॥तेषुनाध्या
येष्वधियानास्तेशाखाक्रतुवज्रेणाभिहताप्रलीनाः॥शे
षान्व्याख्यास्यामः॥तत्रराणायणीयानांसप्तभेदाश्वमे
धिकाः॥राणायणीनीयासुग्राःकालोपामहाकालोपालोग

लाशाट्यिलाकोथुमाश्चेति॥ तत्रकौथुमानांसप्तप्रपाठ
कंति॥ आसुरायणवार्त्तायणीयावादरायणीयाप्रौढ
लिंवैनघ्नतः प्राचीनयोग्यानैगेयाश्चेति॥ तेषामध्या
यनमधीतिशातमाग्नेयंपावमानंवतुःशातंऐंद्रंतुषडु
शाकंयानिगायंतिसामगाताध्यधीत्यचुडाप्रतरोभ
वति॥ त्रिष्टाध्यधीत्यत्रिष्टविंशतिकोभवति॥ तत्रकेचि ४ ४
त्पुनरौछिष्टंकृतंसामतंत्रंचतत्संज्ञाधातुलक्षणमितिवि
धीयते॥ अष्टौसामसहस्राणिसामानिशतानिनवतिदश
तिसवालखिल्यकाःसरहस्यंससुपर्णंचप्रथमेतत्सामद
र्पणं॥ सारएपकानिसौर्याणिनेतत्सामगणंस्मृतं॥ ३॥
स्प अथर्ववेदस्यनवभेदाभवंति॥ पिप्पलाःशौनकादा
मोदातोतायनाजाबालायनाब्रह्मपलाशाकुनखिदे

वदर्षिचरणविद्याश्चेति॥ तेषामध्ययनंद्वादशैवसह
स्राणिअलंबानिचारिकं॥ एतद्वेदरहस्यंस्यादथ
वेदस्यविस्तरातेषांपंचकल्पाभवंति॥ कल्पेकल्पेषु
पंचशतानिभवंति॥ नक्षत्रकल्पोविधानकल्पोविता
नकल्पःसंहिताविधेरानिवारकल्पशांतिकल्पश्चेति॥
सर्वेषामेववेदानामुपवेदाभवंति॥ ऋग्वेदस्यायुर्वेद
उपवेदोयजुर्वेदस्यधनुर्वेदोपवेदोसामवेदस्यगांध
र्ववेदउपवेदोथर्ववेदस्यशिल्पिशास्त्रमित्याहभग
वान्कात्यायनः॥ ४॥ सहिभगवान्ऋग्वेदमेवेदास्तेषा
मेकैकस्यकीदृशोरूपवर्णविभागइत्युच्यते॥ ऋ
ग्वेदःपद्मपत्राक्षःप्रलंबजठरःसुविभक्तशिरो

कुचितकेराश्रुश्मश्रुश्लक्ष्णोगोक्षीरवर्णः श्वेतवर्णो
नकीर्तितः॥प्रमाणेननवबितस्तयः ग्रिवापंच॥यजुर्वेद
पिंगाक्षः क्षामध्यस्थूलः कपोलस्तोघ्रायतवर्णः प्रा
देशनिषट्दीर्घत्वेनयजुंश्रिवोवेदः तस्येतद्रूपंप्रकीर्ति
तं॥सामवेदोनित्यस्रग्वीसुप्रीतः शुचिः शुचिवासाक्षौ
मिदंतोवृत्तछरीरश्चमीदंडीकातरायणः आदित्यवर्णोव
र्णेनषडरत्निमात्रः॥अथर्ववेदःस्तीक्ष्णतरः प्रचंडःका
मरूपःविश्वात्माविष्टस्कूक्षुदकर्मीसुसाध्यासुविश्वस्य
जगन्मूर्धिगोलवः स्वङ्गारवाध्याईनीलोपलवर्णोवर्णेन
प्राज्ञोनवरत्निमात्रःसंमितः स्वदारसंतुष्टः परदारत्यागीश्चे
ति॥ऋग्वेदस्यात्रियगोत्रंसोमदैवत्यंगायत्रीछंदोयजुर्वे

स्यकाश्यपगोत्रंरुद्रदैवत्यंत्रिष्टुप्छंदः॥सामवेदस्यभा
द्वाजगोत्रंइंद्रदैवत्यंजगतीछंदोथर्ववेदस्यवैखानस
गोत्रंब्रह्मदैवत्यंअनुष्टुप्छंदः यइमेवेदानांनामरूप
मात्रंदैवतंछंदःप्रमाणंवर्णंवर्णयति॥अविद्वान्विद्वान्
भवतिजन्मजन्मनिवेदपारगोभवति॥अव्रतीव्रतीभवति॥
अप्रीतःप्रीतोभवतिअब्रह्मचारीब्रह्मचारीभवतिजातिस्मो
शेजायते॥यइदंश्रवणंद्वादशवर्षाण्यावर्तयेत्स्त्रियंपुमां
संजायतेपुत्रोभवेद्भवेदपारगः॥१॥यइ० श्राद्धका०॥अक्षय्यं
लभतेश्राद्धंपितरश्चैवोपतिष्ठंति॥२॥योधीतेच० सविप्रः पंक्ति
पावनः॥तारयेत्सप्तपूर्वान्पुरुषान्सप्तसप्ततिः॥३॥यइ० प
ठेत्सर्वसुपर्वसु॥शुचिर्विधूतपाप्मावब्रह्मलोकंयायात्कल्प
ति॥ब्रह्मलोकंयायात्कल्पतेइत्याहभगवान्कात्यायनः॥४॥इ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चरणव्यूहः